# Shri Mahamari Sahasranamavali 1000 Names

# श्रीमहामारीसहस्रनामावलिः

## Document Information

Text title : mahAmArIsahasranAmAvaliH

File name : mahAmArIsahasranAmAvaliH.itx

Category : devii, sahasranAmavalI, devI, otherforms

Location : doc_devii

Author : Kittu Sir - Sri. T. S. Krishnamoorthy shAstri, Tetiyur, Tamil Nadu, India (1950)

Proofread by : PSA Easwaran

Description/comments : Provided by Sankara Dass Nagoji https://www.kanchimatamkudanthai.org/slokams-in-thamizh. See corresponding stotram.

Latest update : September 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 7, 2020

*sanskritdocuments.org*

# श्रीमहामारीसहस्रनामावलिः

ॐ महामार्यै नमः । महामायायै । महामहिषवाहनायै । मद्यपानरतायै ।
मत्तायै । मधुकैटभमर्दिन्यै । मन्युवृत्तायै । महादेव्यै ।
मदिरापानलम्पटायै । महाहन्त्रे । महाशान्तायै । महाकीर्त्यै ।
महाबलायै । महाशक्त्यै । महावीर्यायै । महावेगायै । मनीषिण्यै ।
महोत्पलधरायै । मन्युभीषणायै । महिमालयायै नमः । २०

ॐ महारूपायै नमः । महाक्रूरायै । महामन्त्रायै । महायुधायै ।
महाभक्षायै । महालक्ष्म्यै । महाकाळ्यै । महोत्सवायै ।
मस्तकाग्र्यै । महाहासायै । महितायै । मद्यलोलुपायै । मरुद्गणायै ।
मदोन्मत्तायै । महातलनिवासिन्यै । मज्जायै । मलयजायै । मल्लायै ।
मन्दहासोज्ज्वलन्मुख्यै । महान्धकारशमन्यै नमः । ४०

ॐ महारण्यालयस्थितायै नमः । मनोज्ञायै । महितोदन्तायै ।
मदघूर्णितलोचनायै । महाश्रयायै । महामुख्यायै । महाजिह्वायै ।
मलापहायै । महापद्मवनान्तस्थायै । मञ्जुलायै । मङ्गलालयायै ।
महेच्छायै । मन्मथस्तुत्यायै । मदनायै । मदमोहिन्यै ।
मर्मस्पृशायै । मत्स्यलोलायै । महेश्यै । मञ्जुभाषिण्यै ।
मनस्विन्यै नमः । ६०

ॐ महोद्वेगायै नमः । महासङ्कटहारिण्यै । महासत्त्वायै ।
महानन्दायै । महाकामायै । महाशनायै । महाभगवत्यै ।
मह्यायै । महारावायै । मनोन्मन्यै । महानलपदाचारायै ।
महाजनवरप्रदायै । महाकामेश्वरीदूत्यै । महाकालाग्निरूपिण्यै ।
मकारादिक्षकारान्तवर्णमालाविलासिन्यै । महिलायै । मन्दहासास्यायै ।
महाराज्यप्रदायिन्यै । महाङ्कुशायै । महानादायै नमः । ८०

ॐ महादुर्गायै नमः । महेश्वर्यै । महावेशायै । महाढक्काधरायै ।
मङ्गलदायिन्यै । मङ्गलायै । मधुरालापायै । महावेतालमर्दिन्यै ।

महागौर्यै । महामात्रे । महाकोलाहलप्रियायै । महापिष्टाशनप्रीतायै ।
महाविस्फोटरूपिण्यै । महाचण्ड्यै । महावीरायै । महाग्रासायै ।
महीमय्यै । महामोहान्धकारघ्न्यै । महादारिद्र्यनाशिन्यै । महाशूलायै नमः । १००

ॐ महेष्वासायै नमः । महाकाशनिवासिन्यै । महारोगप्रशमन्यै ।
महाभयविनाशिन्यै । महेश्यै । मन्दगमनायै । मन्दहासोज्ज्वलन्मुख्यै ।
मदालसगत्यै । मन्त्ररूपिण्यै । ममतायै । मत्यै ।
मयूरपिञ्छिकोत्तंसायै । महालावण्यशालिन्यै । महाहिवलयायै ।
मन्युघोषणायै । मधुराकृत्यै । महिषघ्न्यै । महानिष्ठायै ।
मथुरापुरनायिकायै । महान्यासप्रियायै नमः । १२०

ॐ मध्यमायै नमः । मानसविहारिण्यै । मार्यै । मायायै । माननीयायै ।
माधवप्रियसोदर्यै । मात्रे । मालाविभूषायै । मायै । मादिन्यै ।
मार्गदर्शिन्यै । मागधीवनमध्यस्थायै । माषान्नप्रीतमानसायै ।
माहेश्वर्यै । मानसौकवाहनायै । मासरुपिण्यै । मायाहतासुरगणायै ।
मातृमण्डलमध्यगायै । मालिन्यै । मालतीजातीमल्लिकादिसमर्चितायै नमः । १४०

ॐ मित्रप्रियायै नमः । मित्रपूज्यायै । मिहिरारुणभास्वरायै । मीमांसायै ।
मीननयनायै । मीनकेतनपूजितायै । मीनाक्ष्यै । मुद्गरधरायै ।
मुण्डिन्यै । मुण्डमालिन्यै । मुख्यायै । मुक्तावलीभूषायै ।
मुनिमानसहंसिन्यै । मुण्डादिदैत्यदर्पघ्न्यै । मुसलायुधधारिण्यै ।
मूलमन्त्रात्मिकायै । मूलाधारपद्मासनस्थितायै । मूर्तायै ।
मूकासुरहरायै । मूलकर्मविनाशिन्यै नमः । १६०

ॐ मृगनाभिलसत्कण्ठ्यै नमः । मृद्वङ्ग्यै । मृगवाहनायै ।
मृदुपादाम्बुजायै । मृग्यायै । मृदुलायै । मृत्युनाशिन्यै ।
मृणालिकातन्तुनिभायै । मृगनाभिविलेपनायै । मृगाङ्कमुकुटायै ।
मृत्युमार्यै । मृत्युञ्जयप्रियायै । मेधायै । मेधावत्यै ।
मेघचारिण्यै । मेखलावत्यै । मैरेयपानसुप्रीतायै ।
मोहध्वान्तदिवाकरायै । मोहायै । मोहप्रदायै नमः । १८०

ॐ मोहनाशिन्यै नमः । मोक्षदायिन्यै । मौञ्ज्यै । मौञ्जीधरायै ।
मौलिसर्पायै । मौनिजनप्रियायै । मन्दारकुसुमप्रख्यायै ।
मन्त्रज्ञायै । मन्त्ररूपिण्यै । मञ्जुप्रसन्नवदनायै । मञ्जुलायै ।

मङ्गलप्रदायै । मांसलायै । मांसनिलयायै । मांसभक्षणलालसायै ।
यशस्विन्यै । यताहारायै । यमबाधाविनाशिन्यै । यज्ञोपवीतिन्यै ।
यज्ञफलदायै नमः । २००

ॐ यतमानसायै नमः । यथार्थवचनायै । यन्त्रनिलयायै ।
यज्ञरक्षिण्यै । यज्ञमात्रे । यज्ञभोक्र्यै । यज्ञेश्यै ।
यज्ञसम्भवायै । यज्ञक्रियायै । यज्ञरूपायै । यज्ञाङ्ग्यै ।
यन्त्रमध्यगायै । यवागूपानसुप्रीतायै । यज्ञधूपकुतूहलायै ।
यमुनायै । यरलवाकारायै । यक्षराज्ञ्यै । यजुःस्वरायै । यशोदायै ।
यन्त्रनटनायै नमः । २२०

ॐ यक्ष्मरोगविनाशिन्यै नमः । यमायै । यक्ष्महरायै ।
यष्टिधारिण्यै । यजनप्रियायै । यक्षिण्यै । यक्षगन्धर्वपूजितायै ।
यमरूपिण्यै । यामिन्यै । यामिनीनाथपूजितायै । यानवाहिन्यै ।
यात्रिकैकसहायायै । यस्यै । यामिनीमध्यचारिण्यै । यामसञ्चारिण्यै ।
यागरक्षिण्यै । यागसम्भवायै । युवत्यै । युद्धनिपुणायै ।
युगान्ताग्निविलोचनायै नमः । २४०

ॐ युक्तायै नमः । युगपरायै । युद्धरेणुकायै । युद्धदुर्मदायै ।
यूथमध्यायै । यूथसेव्यायै । यूपबद्धबलिप्रियायै । योषायै ।
योधायै । योगनिष्ठायै । योगिनीगणमध्यगायै । योगप्रदायै ।
योगरूपायै । योगिन्यै । योधकारिण्यै । योगासनायै । योगनिद्रायै ।
योग्यायै । योगिजनप्रियायै । योगगम्यायै नमः । २६०

ॐ योगपरायै नमः । योगिहृत्पद्मवासिन्यै । योषित्पूजनसुप्रीतायै ।
योषिते । योषित्स्वरूपिण्यै । योक्र्यै । यौवनमध्यस्थायै ।
यन्त्रबिन्द्वर्चनप्रियायै । रक्ताम्बरायै । रक्तमुख्यै । रक्ताक्ष्यै ।
रक्तपायिन्यै । रक्ताभिषेकसन्तुष्टायै । रविमण्डलमध्यगायै ।
रक्तोत्पलधरायै । रक्तनिलयायै । रजनीप्रियायै । रक्षायै ।
रक्षाकर्यै । रत्नभूषणायै नमः । २८०

ॐ रजनीचरायै नमः । रम्यायै । रमायै । रसमय्यै ।
रजनीकरशेखरायै । रमण्यै । रामजनन्यै । रम्भायै ।
रमणलम्पटायै । रम्भाफलप्रियायै । रत्नकटकायै । रणभैरव्यै ।
रजस्वलायै । रजोरूपायै । रसाभिज्ञायै । रजोगुणायै । रथिन्यै ।

रजताकारायै । रतायै । रतिपतिप्रियायै नमः । ३००

ॐ रसालयायै नमः । रज्जुहस्तायै । रविनेत्रायै ।
रतिप्रियायै । रञ्जिन्यै । रणसन्तुष्टायै । रक्षोघ्न्यै ।
रणकालिकायै । रमाज्ञापालिन्यै । रत्नभूषणायै । रसशेवध्यै ।
रक्तबीजादिसंहर्त्र्यै । रक्तपानकुतूहलायै । रणप्रियायै । रणकर्यै ।
राकाचन्द्रसमाननायै । रागस्वरूपिण्यै । रागालापसंसक्तमानसायै ।
राक्षस्यै । राहुमुकुटायै नमः । ३२०

ॐ राज्ञ्यै नमः । राज्यसुखप्रदायै । राजीवनयनायै । रात्रिपूजितायै ।
रात्रिचारिण्यै । राधिकायै । राजमातङ्ग्यै । राजहंससमक्रमायै ।
राजराजार्चितायै । राज्यपालिन्यै । राजकन्यकायै । राज्यलक्ष्म्यै ।
रिपुहरायै । रीतिज्ञायै । रुष्टमानसायै । रुन्धिन्यै । रुक्मिण्यै ।
रुक्मवर्णायै । रुधिरलालसायै । रुद्राण्यै नमः । ३४०

ॐ रुचिरप्रख्यायै नमः । रुण्डायै । रुद्रविलासिन्यै ।
रुद्रकाळ्यै । रुद्रदुर्गायै । रुधिरार्द्रीकृताकृत्यै । रुष्टायै ।
रुद्रकलायै । रुद्रकोपायै । रुचिरभक्षिण्यै । रुद्रावेशायै ।
रुद्रमय्यै । रुद्रास्यायै । रुरुवाहनायै । रुचाहस्तायै । रूपवत्यै ।
रूषिताहारलोलुपायै । रूपलक्षणसम्पन्नायै । रूपिण्यै । रूपवर्जितायै नमः । ३६०

ॐ रूपार्कविग्रहायै नमः । रूप्यशैलमध्यनिवासिन्यै । रोदस्यै ।
रोषसंरक्तनयनायै । रोगनाशिन्यै । रोहिण्यै । रोषिण्यै ।
रोषज्वालिन्यै । रोषवर्जितायै । रोषावेशाहतारातिमण्डलायै ।
रौद्ररूपिण्यै । रौद्रकोपायै । रङ्गमार्यै । रञ्जिन्यै ।
रङ्गमालिन्यै । रञ्जितायै । रम्यवदनायै । रंहसे । राङ्गलधारिण्यै ।
लवित्रधारिण्यै नमः । ३८०

ॐ लक्ष्यायै नमः । लकुल्यै । लक्षणोज्ज्वलायै । लक्षाण्डनायिकायै ।
लज्जायै । ललितायै । लक्षणप्रदायै । लघिमायै । लक्ष्यदायै ।
लभ्यायै । लघुश्यामायै । लयेश्वर्यै । ललज्जिह्वायै । लब्धवर्णायै ।
लवङ्ग्यै । लशुनाशनायै । लघ्व्यै । लतायै । ललत्केशायै ।
लसन्त्यै नमः । ४००

ॐ लवणाशनायै नमः । लयस्थित्युद्भवाधीशायै । लघुपूजाप्रसादिन्यै ।
लक्ष्मणाग्रजसम्पूज्यायै । लब्धसर्वमनोरथायै । लम्पटायै ।

लवसन्तुष्टायै । लङ्कानगरवासिन्यै । लावण्यविग्रहायै ।
लाभदायिन्यै । लास्यतोषिण्यै । लास्यप्रियायै । लास्यलोलायै । लासिन्यै ।
लाजभक्षिण्यै । लालसायै । लासिकायै । लास्यायै । लावण्यगुणशालिन्यै ।
लाक्षारससवर्णाभायै नमः । ४२०

ॐ लाङ्गलायुधधारिण्यै नमः । लिप्सायै । लिप्तायै । लिङ्गपूज्यायै ।
लिङ्गिन्यै । लिङ्गवर्जितायै । लिप्तगोरोचनायै । लिप्तचन्दनायै ।
लिकुचस्तन्यै । लिकुचान्नप्रियायै । लीलायै । लीलासृष्टजगत्त्रयायै ।
लीलावत्यै । लुब्धमनसे । लुब्धायै । लुञ्छितकेशिन्यै ।
लेलिहानशिखायै । लेखायै । लेशपूजाप्रसादिन्यै । लोहितायै नमः । ४४०

ॐ लोलनयनायै नमः । लोकेश्यै । लोकपालिन्यै । लोलम्बमालिन्यै ।
लोकवन्दितायै । लोहितेक्षणायै । लौकिक्यै । लौकिकाचारायै ।
लम्बमानपयोधरायै । लम्बीजरूपिण्यै । वन्ध्यायै । वरदायै ।
वसुमालिन्यै । वशिन्यै । वसुमध्यस्थायै । वसुमण्डलपूजितायै ।
वशित्वदायिन्यै । वज्रधारिण्यै । वल्लकीप्रियायै । वनितायै नमः । ४६०

ॐ वन्दितायै नमः । वर्णायै । वरिष्ठायै । वरदायिन्यै । वसुधायै ।
वरुणाराध्यायै । वत्सलायै । वटयक्षिण्यै । वनमध्यस्थितायै ।
वन्यायै । वसुदायै । वनमल्लिकायै । वनकेलिरतायै । वक्रकेशिन्यै ।
वर्णिन्यै । वरायै । वलक्षायै । वज्रनिर्घोषायै । वरेण्यायै ।
वनकन्यकायै नमः । ४८०

ॐ वरदायै नमः । वल्लभायै । वत्सायै । वराभीतिलसत्करायै ।
वदन्त्यै । वर्मिण्यै । वश्यायै । वल्लकीवादनप्रियायै ।
वराभीतिलसत्पाणये । वन्दारुजनपालिन्यै । वयस्यायै । वर्धिन्यै ।
वर्यायै । वह्निमण्डलवासिन्यै । वह्निस्वरूपिण्यै । वह्निनयनायै ।
वल्गुभाषिण्यै । वरिवस्यारतायै । वामायै । वाराह्यै नमः । ५००

ॐ वायुवाहनायै नमः । वारुणीपानसुप्रीतायै । वानर्यै । वाहनप्रियायै ।
वामाचारवत्यै । वाममार्गपूजाप्रसादिन्यै । वाण्यै । वायुसमाराध्यायै ।
वासवादिसुरार्चितायै । वादित्रघोषसुप्रीतायै । वारुणीमदघूर्णितायै ।
वाग्वादिन्यै । वामकेश्यै । वाजिवाहनगामिन्यै । विश्वम्भरायै ।
विशालाक्ष्यै । विषमायै । विष्णुसोदर्यै । विविधायुधसन्नद्धायै ।
विष्णुमायायै नमः । ५२०

ॐ विराण्मय्यै नमः । विपुलाङ्ग्यै । विघ्नदात्र्यै । विचित्रायै ।
विघ्नहारिण्यै । विहायसगतये । विद्याधर्यै । विश्वविमोहिन्यै ।
वियत्केश्यै । विरूपाक्ष्यै । विमलायै । विकरालिन्यै । विश्वग्रासायै ।
विष्णुरूपायै । विजनालयवासिन्यै । विकारायै । विपिनावासायै ।
विश्वासायै । विधिवन्दितायै । विभावर्यै नमः । ५४०

ॐ विद्रुमाभायै नमः । विद्रुमाभरणोज्ज्वलायै । विभूत्यै ।
विष्णुवनितायै । विशदायै । विश्वमोहिन्यै । विषमायै ।
विबुधाराध्यायै । विनतायै । विश्वसाक्षिण्यै । विस्फोटक्यै ।
विरूपाक्ष्यै । विन्ध्याचलनिवासिन्यै । विनोदायै । विष्णुभगिन्यै ।
विप्रकार्यै । विशारदायै । विशालायै । विपुलायै । विप्रवन्दितायै नमः । ५६०

ॐ विपुलस्तन्यै नमः । विश्ववन्द्यपदाम्भोजायै ।
विचित्राभरणोज्ज्वलायै । विस्तारजघनायै । विद्यायै ।
विधुमण्डलवासिन्यै । विमानायै । विमनायै । विश्वायै । विजयायै ।
विपिनालयायै । विविधान्नप्रियायै । वित्तदायिन्यै । विपुलोदनायै ।
विषूच्यै । विषसंहर्त्र्यै । वीरवन्द्यपदाम्बुजायै । वीरमात्रे ।
वीरशक्त्यै । वीरायै नमः । ५८०

ॐ वीरपराक्रमायै नमः । वीरासनायै । वीतिहोत्रनयनायै ।
वीरवन्दितायै । वीरमार्यै । वीरदुर्गायै । वीथीसञ्चारलालसायै ।
वीणावादनसुप्रीतायै । वृद्धायै । वृजिननाशिन्यै । वेलायै ।
वेगवत्यै । वेगायै । वेदान्तप्रतिपादितायै । वेगितायै । वेदजनन्यै ।
वेषाढ्यायै । वेत्रधारिण्यै । वेदनायै । वेदनाहर्त्र्यै नमः । ६००

ॐ वैदिक्यै नमः । वैरिमर्दिन्यै । वैकुण्ठवासिन्यै ।
वैश्वानरमध्यकृतालयायै । वैशाखपूर्णिमापूजाप्रीतायै ।
वैश्वानरेक्षणायै । वैदेह्यै । वैष्णव्यै । वैरिवर्जितायै ।
व्योमवासिन्यै । व्योमालयायै । व्योमकेश्यै । वौषड् । व्यालिविभूषितायै ।
वंशाभिरक्षिण्यै । वंशदेवतायै । वेङ्कटेश्वर्यै । शमदायै ।
शर्मदायै । शब्दरूपिण्यै नमः । ६२०

ॐ शरधारिण्यै नमः । शर्वाण्यै । शबलायै । शक्रवन्दितायै ।
शत्रुसूदिन्यै । शक्त्यै । शवासनायै । शक्तिवृन्दसेवितपादुकायै ।
शकुन्तवाहनायै । शम्भुमोहिन्यै । शशिशेखरायै ।

शशाङ्काभमुख्यै । शस्त्रधारिण्यै । शमदमोज्ज्वलायै । शमायै ।
शनैश्चरप्रीतायै । शवपञ्चकमञ्चगायै । शरासनकरायै ।
शब्दब्रह्मरूपायै । शरासनायै नमः । ६४०

ॐ शताक्ष्यै नमः । शतभूषाढ्यायै । शरतल्पाधिशायिन्यै ।
शरीरिण्यै । शतस्फोटरूपिण्यै । शशिभूषणायै । शारदायै ।
शारदाराध्यायै । शाम्भव्यै । शास्त्रवेदितायै । शार्दूलवाहनायै ।
शास्त्रविद्यायै । शासनकारिण्यै । शान्त्यै । शान्तिमत्यै ।
शान्तिदायिन्यै । शान्तमानसायै । शाकम्भर्यै । शापहन्त्र्यै ।
शाकिन्यादिसमन्वितायै नमः । ६६०

ॐ शिवायै नमः । शिवप्रियायै । शिल्पकलायै । शिशुसमाकृत्यै ।
शिल्पिन्यै । शिखिमध्यस्थायै । शिवदूत्यै । शिवङ्कर्यै । शिष्टायै ।
शिष्टसमाचारायै । शिष्टेष्टायै । शीतलाम्बिकायै । शीतलायै ।
शीतलादेव्यै । शीतायै । शीतनिवारिण्यै । शीलायै । शीलवत्यै ।
शीधुपानलोलुपमानसायै । शीतज्वरहरायै नमः । ६८०

ॐ शीघ्रवरदायै नमः । शुक्रपूजितायै । शुद्धायै । शुष्कायै ।
शुक्लवर्णायै । शुष्काङ्ग्यै । शुभदायिन्यै । शुभायै ।
शुभान्वितायै । शुम्भदैत्यसंहारिण्यै । शुच्यै । शुचिस्मितायै ।
शुकप्रीतायै । शुकालापायै । शुभोदयायै । शुक्रवारप्रियायै ।
शून्यायै । शूलिन्यै । शूलधारिण्यै । शूरसेनायै नमः । ७००

ॐ शून्यरूपायै नमः । शून्यकेश्वरनाशिन्यै । शूर्पहस्तायै ।
शूलरोगहारिण्यै । शूर्पमस्तकायै । श्रद्धायै । श्रमहरायै ।
श्रद्धावत्यै । शृङ्गारनायिकायै । श्रियै । श्रीमत्यै ।
श्रुतिज्ञेयायै । श्रुतिबोधितवैभवायै । श्रुत्यन्तज्ञेयसौभाग्यायै ।
शृङ्खलामोचिन्यै । श्रुत्यै । श्रोत्रियायै । श्रुतचारित्रायै ।
श्रोणिशोभाजिताचलायै । श्रीम्बीजनिलयायै नमः । ७२०

ॐ शेषमुकुटायै नमः । शेषशायिन्यै । शेखरीकृतशीतांशवे ।
शेमुष्यै । शैलवासिन्यै । शैव्यै । शैवालयायै । शैलकन्यायै ।
शैलादिवाहनायै । शैवमञ्चकपीठस्थायै । शोभाजितदिवाकरायै ।
शोभिन्यै । शोकशमन्यै । शोभायै । शोभनकारिण्यै । शोणाभायै ।
शोणितप्रीतायै । शोधिन्यै । शोभनाकृत्यै । शोकहीनायै नमः । ७४०

ॐ शोकहन्त्र्यै नमः । शोरिमायास्वरूपिण्यै । शौण्डायै ।
शौर्यप्रदायै । शङ्खहस्तायै । शङ्करभामिन्यै ।
शङ्कराभरणप्रीतायै । शङ्खपद्मनिधिस्तुतायै ।
शान्त्यतीतकलारूपायै । शान्तायै । षट्कोणवासिन्यै । षष्ठ्यै ।
षट्चक्रनिलयायै । षडध्वातीतरूपिण्यै । सकलायै ।
सकलाराध्यायै । सकलेष्टवरप्रदायै । सप्तम्यै । समयाचारायै ।
सप्तस्वरमयाकृत्यै नमः । ७६०

ॐ सर्वदायै नमः । सर्पभूषाढ्यायै । सर्वमङ्गलदायिन्यै ।
सगुणायै । सद्गुणायै । सत्त्वगुणायै । समरसायै । समायै । सभ्यायै ।
सरस्वत्यै । सर्वमङ्गलायै । सगुणात्मिकायै । सर्वार्थदायिन्यै ।
सर्वमन्त्रयन्त्राधिनायिकायै । साकिनीरूपिण्यै । साध्यायै । साध्व्यै ।
सादादिरूपिण्यै । साक्षिभूतायै । सामरस्यपरायै नमः । ७८०

ॐ साध्वसनाशिन्यै नमः । सिद्धमन्त्रायै । सिद्धिदात्र्यै ।
सिद्धगन्धर्वपूजितायै । सिताम्भोजालयायै । सिद्धायै ।
सिन्दूरतिलकोज्ज्वलायै । सीमायै । सीतायै । सीधुपानप्रियायै ।
सीमाधिदेवतायै । सुमुख्यै । सुभगायै । सुभ्रुवे । सुन्दर्यै ।
सुन्दराननायै । सुराप्रियायै । सुवर्णाभायै । सुराधिपनमस्कृतायै ।
सुधायै नमः । ८००

ॐ सुधार्णवाध्यक्षायै नमः । सुरापानकुतूहलायै । सूचक्यै ।
सूर्यनयनायै । सूकर्यै । सूकराननायै । सृणिहस्तायै ।
सृष्टिकर्त्र्यै । सेव्यायै । सेनाग्रगामिन्यै । सैरिभासुरसंहर्त्र्यै ।
सोमाक्ष्यै । सोमवल्ल्यै । सोममण्डलमध्यस्थायै । सौम्यायै ।
सौदामिनीप्रभायै । सौभाग्यदायिन्यै । सौख्यदात्र्यै । सौम्बीजरूपिण्यै ।
सम्पत्कर्यै नमः । ८२०

ॐ संशयघ्न्यै नमः । सम्राज्ञ्यै । सङ्गमक्षमायै ।
संयुगामोदिन्यै । संविद्रूपिण्यै । सन्ततिप्रदायै । सन्ध्यायै ।
सङ्कष्टसन्दोहहन्त्र्यै । सन्धानकारिण्यै । सुन्दोपसुन्दसंहर्त्र्यै ।
सान्द्रानन्दस्वरूपिण्यै । स्निग्धौदनप्रियायै । स्निग्धायै । स्मृत्यै ।
स्मेरमुखाम्बुजायै । हरदूत्यै । हयारूढायै । हसन्त्यै । हरभामिन्यै ।
हरिद्रान्नैकरसिकायै नमः । ८४०

ॐ हरिद्रायै नमः । हरिसोदर्यै । हतदैत्यमहासेनायै ।
हठात्कारहतासुरायै । हरिद्रालिप्तसर्वाङ्ग्यै । हविर्भोक्त्र्यै ।
हलायुधायै । हाकिन्यै । हास्यसन्तुष्टायै । हाटकाभरणोज्ज्वलायै ।
हाहाहूहूमुखस्तुत्यायै । हालामदविघूर्णितायै । हिमांशुबिम्बवदनायै ।
हिमालयकृतालयायै । हिमांशुशकलोत्तंसायै । हितायै ।
हिमकरेक्षणायै । हुम्फडुच्चारणप्रीतायै । हुङ्कारातिभयङ्करायै ।
हुङ्कारनिहतानेकदैत्यायै नमः । ८६०

ॐ हूहूप्रपूजितायै नमः । हृद्यायै । हेमप्रभायै ।
हेतिविभूषितकराम्बुजायै । हेमदात्र्यै । हेमवर्णायै ।
हेलानिहतदुर्जनायै । हेलालोलायै । हैमवत्यै । होत्र्यै ।
होतृवरप्रदायै । होमाग्निकुण्डमध्यस्थायै । होमकर्मैकसाक्षिण्यै ।
हौम्बीजजपसुप्रीतायै । हंसाक्ष्यै । हंसवाहनायै ।
लम्बीजजपसुप्रीतायै । लम्बीजाक्षररूपिण्यै । क्षपापूजनसुप्रीतायै ।
क्षयरोगहरायै नमः । ८८०

ॐ क्षमायै नमः । क्षपाकरलसन्मौल्यै । क्षपासञ्चारिण्यै ।
क्षपायै । क्षालिताशेषपापौघायै । क्षामदुर्भिक्षनाशिन्यै ।
क्षिप्रपूजारतायै । क्षिप्रफलदायै । क्षिप्रकारिण्यै ।
क्षिप्रप्रसादिन्यै । क्षिप्रमार्यै । क्षितिधरायै । क्षित्यै ।
क्षीणपापायै । क्षीरपानप्रियायै । क्षीरान्नभोजिन्यै ।
क्षुद्ररोगहरायै । क्षुद्रकृत्यानाशनकारिण्यै ।
क्षुद्रग्रहार्तिशमन्यै । क्षेत्रक्षेत्रज्ञरूपिण्यै नमः । ९००

ॐ क्षेत्रपालप्रियायै नमः । क्षेमदायिन्यै । क्षेत्रपालिन्यै ।
क्षौमाम्बरपरीधानायै । क्षौद्रामृतरसप्रियायै ।
क्षम्बीजजपसुप्रीतायै । क्षम्बीजाक्षररूपिण्यै । अम्बिकायै ।
अनादिनिधनायै । आराधनप्रीतमानसायै । इन्द्राण्यै । इन्दिरायै ।
ईशानवल्लभायै । उद्दण्डविक्रमायै । उग्रमार्यै । उदितार्काभदेहायै ।
एनःकूटनाशिन्यै । ऐश्वर्यदायिन्यै । ऐँकारबीजवर्णस्वरूपिण्यै ।
ओष्ठच्छविविनिर्धूतबिम्बायै नमः । ९२०

ॐ भौङ्कारमातृकायै नमः । अकारादिविसर्गान्तवर्णमालास्वरूपिण्यै ।
कमलायै । कलनायै । कर्मसाक्षिण्यै । करुणालयायै । कल्मषघ्न्यै ।

कलिध्वंसकारिण्यै । कर्कशस्वरायै । कात्यायन्यै । कालरात्र्यै ।
किन्नर्यै । कीर्तिदायिन्यै । कुरुकुल्लायै । कुवलयदलनीलायतेक्षणायै ।
कुष्ठरोगप्रशमन्यै । कूश्माण्डग्रहनाशिन्यै । कृपायै ।
कृपावत्यै । कृष्णमार्यै नमः । ९४०

ॐ कृत्यानिवारिण्यै नमः । केवलायै । कोपविध्वस्तसमस्ता
सुरमण्डलायै । कौमार्यै । कौशिक्यै । कंसमर्दिन्यै । खलनाशिन्यै ।
गजारूढायै । गतये । गानलोलायै । गीतविशारदायै । गुर्व्यै ।
गुहप्रियायै । गूढविग्रहायै । गृध्रवाहनायै । ग्रामरक्षाकर्यै ।
ग्रामदेव्यै । घर्घरनादिन्यै । चण्डमार्यै । चण्डघण्टायै नमः । ९६०

ॐ चण्डिकायै नमः । चारुविक्रमायै । चिरन्तनायै ।
चित्रमाल्यभूषणायै । चेटकावृतायै । छलविध्वस्तदैत्येन्द्रायै ।
जयश्रियै । जगदीश्वर्यै । टङ्कहस्तायै । ठान्तमन्त्रायै ।
डमरुध्वनिमोदितायै । ढक्काधर्यै । तडिल्लेखायै ।
दाडिमीकुसुमप्रभायै । देव्यै । देवनुतायै । दैत्यमर्दिन्यै ।
दोषवर्जितायै । दन्तपङ्क्तिप्रभापुञ्जतिरस्कृतदिवाकरायै ।
धनधान्यकर्यै नमः । ९८०

ॐ धान्यमालिन्यै नमः । नवचण्डिकायै । नादब्रह्ममय्यै ।
पानपात्रहस्तायै । पराम्बिकायै । फलदायै । बन्धनिर्मोक्त्र्यै ।
भेरुण्डायै । भयहारिण्यै । मदद्रवायै । यशोदात्र्यै । रहस्यायै ।
ललितालकायै । वह्निरूपायै । श्मशानस्थायै । षडङ्गपरिवारितायै ।
समस्तदेवविनुतायै । सर्वदेवस्वरूपिण्यै । समस्तशक्तिचक्रेश्यै ।
हृदयङ्गमरूपिण्यै नमः । १०००

इति तेतियूरवासी कृष्णमूर्तिशास्त्रीविरचितं
श्रीमहामारीसहस्रनामावलिः समाप्ता ।

The author of the work is Sri. T. S. Krishnamoorthy shAstri.
He is popularly known as “kittu sir” in the neighboring villages.
Sri Kittu sir hails from the village Tediyur
(Thiruvarur district, Tamil Nadu) and served as sanskrit pandit
in Vishnupuram and Semmangudi villages. Timeline: 4-July-1926
to 1-Jan-2009. He had worked in Thanjavur Saraswathi Mahal

library in his later years.

This work is preserved by his student Dr. N. Veezhinathan, who received the President's award for Sanskrit in 2002.

Dr. Veezhinathan is the primary proof reader of the stotra.
The stotra was encoded by Sankara Dass Nagoji nagojip at gmail.com and proofread by Mrs. Renuka Kamakoti,
The nAmAvalI is proofread by PSA Easwaran.

---

*Shri Mahamari Sahasranamavali 1000 Names*

pdf was typeset on September 7, 2020

Please send corrections to *sanskrit@cheerful.com*